चतुरङ्गुलप्रस्तारं फालमग्नौ तापयेत्। तत्र प्राङ्विवाकोधर्मावाहनादिहवनान्तं कर्म कृत्वा दक्षिणां दत्त्वा समन्त्रकं प्रतिज्ञापत्रं शोध्यशिरसि निधाय ओम् "त्वमग्ने वेदाश्चत्वारस्त्वञ्च यज्ञेषु हूयसे। त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम्। जठरस्थो हि भूतानां ततो वेत्सि शुभाशुभम्। पापं पुनासि वै यस्मात् तस्मात् पावक उच्यसे। पापेषु दर्शयात्मानमर्चिष्मान् भव पावक!। अथ वा शुद्धभावेषु शीतो भव हुताशन!। त्वमेव सर्वभूतानामन्तश्चरसि साक्षिवत्। त्वमेव देव! जानीषे न विदुर्यानि मानवाः। व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति। तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि"। इत्येतैः फालस्थमग्निमभिमन्त्रयेत्। शोध्यस्तु "त्वमग्ने सर्वभूतानामन्तश्चरसि पावक!। साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं कवे! मम" इत्यनेनाभिमन्त्र्याग्निवर्णं फालं जिह्वया सकृत् लिह्यात्। न दह्येत् शुद्धः"।

**फाल्गुन** पु॰ फल्गुनीयुक्ता पौर्णमासी अत्र सा यत्र मासे जैत्रे वर्षे अर्द्धमासे वा अण्। चैत्रावधिके द्वादशे १स्वनामख्याते मासभेदे २तादृशे पक्षे ३जैत्रे वर्षभेदे च कार्त्तिकशब्दे १९४९ पृ॰ दृश्यम्। "अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभोमत" इत्युक्तेः पौर्णमास्यां फाल्गुनीरूपनक्षत्रद्वययोगात् तथात्वम्। स च मासः त्रिविधः मुख्यगौणचान्द्रसौरभेदात् तत्र कुम्भस्थरव्यारब्ध शुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः। तथाभूतकृष्णप्रतिपदादिपौर्णमास्यन्तो गौणः, कुम्भस्थरविकः सौरः इति। अयञ्च शब्दः दन्त्यनान्ते मेदिनिकोषे पठितः। फाल्गुने गगने फेने णत्वमिच्छन्ति बर्बराः" कारिकायाम् णत्वमितिकल्पनं मेदिनिविरोधात् प्रामादिकमेव। ४तत्पौर्णमास्यां स्त्री ङीप्। ५अर्जुनाख्ये पाण्डवे तन्नामकत्वे कारणम् भा॰वि॰४४अ॰उक्तं यथा "उत्तराभ्यां फल्गुनीभ्यां नक्षत्राभ्यामहं दिवा। जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः"। ६अर्जुनवृक्षे पु॰ मेदि॰।

**फाल्गुनानुज** पु॰ फाल्गुनादनुजायते अनु+जन–ड। १चैत्रे मासि २वसन्तकाले हारा॰। ३नकुलसहदेवयोः द्वि॰ व॰।

**फाल्गुनिक** पु॰ फाल्गुनीनक्षत्रयुक्ता पौर्णमासी अस्मिन् मासे ठक्। चैत्रावधिके द्वादशे मासि। [शकोषे शब्दर॰

**फि** पु॰ फल–वा॰ डि। १निष्फलवाक्ये २पापे च एकाक्ष॰को॰

**फिङ्गक** पु॰ कलिङ्ग+पृषो॰। (फिङा) पक्षिभेदे शब्दमा॰।

**फिरङ्ग** पु॰ स्वनामख्याते म्लेच्छदेशे१ रोगविशेषे२ भावप्र॰ तत्र फिरङ्गस्य निरुक्तिमाह। "फिरङ्गसंज्ञके देशे बाहुल्येनैव यद्भवेत्। तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः"। तस्य विप्रकृष्टं निदानमाह गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम्। फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः। व्याधिरागन्तुजो ह्येष दोषाणामनुसंक्रमः। भवेत्ता लक्षयेत्तेषां लक्षणैर्भिषजां वरः"। फिरङ्गिण्याः प्रसङ्गत इति विशेषार्थम्। रूपमाह "फिरङ्गस्त्रिविधो ज्ञेयो बाह्याभ्यान्तरतस्तथा। वहिरन्तर्भवश्चापि तेषां लिङ्गानि च ध्रुवम्। तत्र बाह्यः फिरङ्गः स्याद्विस्फोटसदृशोऽल्परुक्। स्फुटितो व्रणवद्वेद्यः सुखसाध्योऽपि स स्मृतः। सन्धिष्वाभ्यन्तरः स स्यादुभयोर्लक्षणैर्युतः। कष्टदोऽतिचिरस्थायी कष्टसाध्यतमश्च सः"। उपद्रवानाह "कार्श्यं बलक्षयो नासाभङ्गो वह्नेश्च मन्दता। अस्थिशोषोऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी। साध्यत्वादिकमाह वहिर्भवो भवेत् साध्यो नूतनो निरुपद्रवः। आभ्यन्तरस्तु कष्टेन साध्यः स्यादयमामयः। बहिरन्तर्भवो जीर्णः क्षीणस्योपद्रवैर्युतः। बोध्यो व्याधिरसाध्योऽयमित्यूचुर्मुनयः पुरा"। ततोऽस्त्यर्थे इनि। फिरङ्गिन् तद्देशस्थजने तद्रोगयुते च त्रि॰स्त्रियां ङीप्। [विश्वः।

**फु** पु॰ फल–डु। मन्त्रोच्चारणपूर्वके १फुत्कारे २तुच्छवाक्ये च

**फुक** पु॰ खगे शब्दच॰। [फणायां पु॰हेमच॰।

**फुट** त्रि॰ स्फुट–क पृषो॰। १विदीर्णे २प्रस्फुटिते च। ३सर्प॰

**फु(फू)त्** अव्य॰ फल–डुति पृषो॰वा दीर्घः। अनुकरणशब्दे।

**फुत्कर** पु॰फुदित्यव्यक्तं शब्दं करोति कृ–ट। वह्नौ शब्दच॰

**फुत्कार** पु॰ कृ–भावे घञ् फुदित्यव्ययशब्दस्य कारः। फुदित्यव्यक्तशब्दकरणे। फुत्कारयुक्ते वह्नौ आहुतिनिषेधो यथा "अल्पे कक्षे सस्फुलिङ्गे वामावर्त्ते भयानके। आर्द्रकाष्ठैः ससुत्पन्ने फुत्कारवति पावके। कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम्। आहुतिं जुहुयाद्यस्तु तस्य नाशो भवेद् ध्रुवम्" ति॰त॰।

**फुप्फुस** पु॰सुश्रुतोक्ते हृदयस्य वामपार्श्वस्थिते (फुलका) इति ख्याते कोष्ठभेदे "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते" व्याचख्यौ चेदम् "आमस्य स्थानमामाशयः नाभेरूर्द्धम्। अग्नेः स्थानं पच्यमानाशयः नाभिमध्यम्। पक्वस्य स्थानं पक्वाशयः नाभेरधः। मूत्रस्य स्थानं वस्तिः। रुधिरस्य स्थानं यकृत्प्लीहानौ। हृद् हृदयम्। इन्दुरसपाकमलवद् यः